# Saparya Paryayah

# સપર્યા પર્યાયઃ

## Document Information

Text title : Saparya Paryayah

File name : saparyAparyAyaH.itx

Category : upanishhat, upaniShat

Location : doc_upanishhat

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

Saparya Paryayah

# સપર્યા પર્યાયઃ

શ્રીશઃ શ્રેયસ્કામિભિરભ્યર્ચનતોઽન્તર્નિધ્યાનાદ્યાનિર્વ્રિયતામત્ર જગત્યામ્ ।
સત્તામાત્રાનન્દચિદાત્માનમનન્તં સોઽહં તં ત્વામર્ચયિતું ન પ્રભવામિ ॥ ૧॥

સ ધ્યેયો યઃ સંસૃતિભૂમિર્વ્યવધાનાદધ્યેયો નસ્ત્વં તુ ન સાક્ષાદ પરોક્ષાત્ ।
ધ્યાયચ્ચાનુધ્યાયસિ ચેતઃ સ્વયમન્તસ્તં ધ્યાયામિ ત્વામિતિ વન્ધ્યાત્ર મનીષા ॥ ૨॥

સર્વાનન્યસ્ત્વમબાહ્યાન્તરભાવો બાહ્યઞ્ચાસ્યાભ્યન્તરમપ્યસ્ય ખિલાત્મા ।
નિત્યપ્રત્યાસન્નસતસ્તસ્ય તવાત્મન્ નાહં જાને કિંવિધમાવાહનકર્મ ॥ ૩॥

ઓતં પ્રોતં યત્ર સમસ્તં જગદેતત્ સર્વાધારે તિષ્ઠતિ સમ્બાધવિહીનમ્ ।
ભૂમંસ્તસ્ય સ્વે મહિમન્યેવ સતસ્તે કો નામાસાવાસનસઙ્કુલ્પવિડમ્બા ॥ ૪॥

અનાદિભ્યો યસ્ય પરસ્ય પ્રતિપત્ત્યા સંસારાધ્વત્રય્યતિપન્નસ્સુખમેતિ ।
આત્મંસ્તે તસ્યાગતિગત્યાદ્યતિભૂમેર્મિથ્યા નાહં કેન કથં સ્વાગતિકઃ સ્યામ્ ॥ ૫॥

ઇન્દ્રાદ્યાઃ સ્યુર્યસ્ય પરસ્યામરવર્યા વિદ્યામાત્રાલેશવશેનાપિ સદર્ઘ્યાઃ ।
તસ્યાદ્યસ્યાપાણિપદાદેઃ કથમર્ઘ્યં દદ્યામદ્યાનર્ઘવિભૂતેરુદવિન્દુમ્ ॥ ૬॥

વિશ્વાત્મૈકો યસ્ય તુ પાદો ન વિમેયઃ પાદા શ્ ચાન્યે પણ્ડિતરૂપૈરપિ મૃગ્યાઃ ।
તસ્યારૂપસ્યાપદ મૂર્ધાદિવિભક્તેરાપાદ્યં કિં કેન કથં વા તવ પાદ્યમ્ ॥ ૭॥

સન્ધ્યા નદ્યો યસ્ય ચ વાસ્તેયમુદન્વાન્ મેઘાઃ કેશાઃ પ્રાકૃતવિશ્વાપઘનસ્ય ।
તસ્યાપેતપ્રાકૃતસમ્બોધતનોસ્તે કલ્પ્યં મન્યે નાચમનીયં કમનીયમ્ ॥ ૮॥

અધ્યાત્મં યન્મધ્વધિદૈવઞ્ચ વિભક્તં તત્સમ્પૃચ્યૈકાત્મકમાહોપનિષદ્યમ્ ।
સત્વં સર્વાસ્વાદ્યતમસ્તન્મધુપર્કઃ સમ્પ્રીયેથાઃ કિં મધુપર્કેણ કથં વા ॥ ૯॥

યત્રૈકસ્થં સર્વપવિત્રાખિલતીર્થં નિષ્ણાતાઃ સ્યુર્યત્ર વિગચ્છદ્ભવપઙ્કાઃ ।
યદ્વ્યોમ્નોઽપિ વ્યોમ પરં જ્યોતિરપારં તન્ત્વામાત્મન્ કેન વિશુદ્ધં સ્નપ યામિ ॥ ૧૦॥

લોકાલેખ્યં વો હિતશુક્લાસિતરૂપૈઃ સ્યૂતં સૂક્ષ્મૈરમ્બરરૂપં ગુણભેદૈઃ ।
સમ્પર્યાપ્તં પ્રાવરિતું યન્ન વિભ્રમન્ કિં તે તસ્યા અમ્બરમન્યત્કલયામિ ॥ ૧૧॥

અત્રૈગુણ્યે યન્ન જગત્ત્વય્યુપવીતે સૂત્રે સ્યૂતં ભૂતમતો વિશ્વથમાસ્તે ।
તસ્યાસવ્યાદક્ષિણસમ્પૂર્ણતનોસ્તે કલ્પ્યં સૂત્રં કિં ત્રિગુણં સ્યાદુપવીતમ્ ॥ ૧૨॥

યસ્યૈકાંશ[વેશવશાદાનખકેશાત્ ભૂતં ભૂતં રોચનમિન્ધે રુચકાભમ્ ।
તસ્યાસ્થૂલાનણ્વપસિદ્ધાવયવાત્મન્નિર્મેયન્તે કિં મનસાપિ પ્રતિકર્મ ॥ ૧૩॥

યસ્યાનુધ્યાવિધુવધ્યાતતમિસ્રા નાલિપ્યન્તે કર્મભિરચ્છાસિતમિશ્રૈઃ ।
આકાશાદેરપ્યતિસૂક્ષ્મસ્ય વિભો તે તસ્યાલેપસ્યૈવ કુતઃ સ્યાદનુલેપઃ ॥ ૧૪॥

આતિષ્ઠન્તે કેઽપ્યયનન્તે ઘનપુષ્પં ચૂડાપીડં કેચિદપાં પુષ્પમુશન્તિ ।
ભૂમઞ્જાને પુષ્કરપુષ્પં ત્વયિ સર્વં કા કા પુષ્પૈસ્તેન મયાર્ચા તવ કાર્યા ॥ ૧૫॥

યસ્ય પ્રાણો ગન્ધવહશ્છન્દતનોસ્તે યસ્ત્વં ગીતઃ સર્વસુગન્ધઃ શ્રુતિમૌલૌ ।
તસ્યામોદપ્રીતિકૃતે તે કથમાત્મન ધૂપાયેયં ફલ્ગુતમૈર્ગુલગુલધૂમૈઃ ॥ ૧૬॥

અક્ષાણ્યર્થા બુદ્ધિમનોહઙ્કૃતયો વા સન્દીપ્યન્તે સન્દિતભાવાસ્તવ ભાસા ।
ખદ્યોતાત્પ્રત્યસ્તવદીપઃ ખલુ કલ્પ્યઃ તેજો વર્ચો દ્યુમ્નદતેજસ્ત્રિતયસ્ય ॥ ૧૭॥

મૃત્યુર્યસ્યાશેષભુજઃ સ્યાદુપદંશો યો વાઽશ્નીયાત્ કિઞ્ચન નાકિશ્ચનગમ્યઃ ।
યં વિજ્ઞાયાત્યેતિ પિપાસામશનાયાં નૈવેદ્યન્તે તસ્ય નિવેદ્યં કિમિવાત્મન્ ॥ ૧૮॥

પશ્યત્યન્યદ્યત્ર ન દૃશ્યં ન શ઼ૃણોતિ શ્રાવ્યં જ્ઞેયં યત્ર વિજાનાતિ ન કિઞ્ચિત્ ।
ભૂમ્નસ્તસ્યાશેષવિશેષોપશમસ્ય છત્રાદ્યૈર્વા કૈરુપચાર્યં તવ કેન ॥ ૧૯॥

સર્વાત્માઽસન્ યસ્સ પુરસ્તાદથ પશ્ચાત્ ઊર્ધ્વં ચાધો દક્ષિણતશ્ચોત્તરતશ્ચ ।
તસ્યાપારાનન્તમહિમ્નઃ કથમાત્મન્ પ્રાદક્ષિણ્યક્રાન્તિમહં તે કરવાણિ ॥ ૨૦॥

નન્તભ્યોઽન્યોઽસાવહમન્યોઽસ્મિ ચ નન્તા નૈવં ભેદં વેદ પશૂ યામતિયાતઃ ।
યોઽહં સ ત્વં સત્યમહં સ પ્રતિબુદ્ધો બુદ્ધ્યા દધ્યાન્તસ્ય નમસ્યાં તવ કો હમ્ ॥ ૨૧॥

સ્તોત્રં નામ સ્યાદ્ગુણિનો યો ગુણવાદઃ સ્વશ્ચામેયાનન્તગુણો વાપ્યગુણો વા ।
પ્રાધ્વં પારે વાઙ્મનસાધ્વં પરમાત્મન્નાનન્દેયાસ્ત્વં સ કયા નુ સ્તુતિભઙ્ગ્યા ॥ ૨૨॥

યસ્ત્વં બ્રહ્મ ક્ષત્રમશેષા અપિ લોકા વેદા દેવાસ્સર્વમિદં ચાસિ વિભૂમન્ ।
સોશમ્ભૃતો માનસશોકાનતિતીર્ણો ન પ્રાપ્તવ્યં પ્રાર્થનયા તે વિમૃશામિ ॥ ૨૩॥

દેહં દેહં દેવ ઇહાત્મૈવ સપર્યા સોઽહં તન્મે મોહકથાત્યન્તિકશાન્તિઃ ।
કૈવલ્યઞ્ચાતુલ્યપરાનન્દમવાપ્યં નાન્યો દેવો નાપિ સપર્યા ન ફલં વા ॥ ૨૪॥

કતિ કતિ તરવો મે નાર્ચનાલૂનપત્રાઃ કતિ કતિ ન સરસ્યસ્તર્પણોત્કીર્ણતોયાઃ ।
કતિ કતિ ન હરીશાદ્યાલયાઃ ક્રાન્તપૂર્વા વિદિતપરમતત્વો નાધુના કિઞ્ચિદીહે ॥

સપર્યાપર્યાયં પઠત શ઼ૃણુત પ્રત્યહમિમં
વિધૂયાયાસં યે પરમશિવમારાદ્ધુમનસઃ ।
સુખેનૈવાત્યન્તં સુખમિહ ચ નિર્વાણપરમં
લભધ્વં મોદધ્વં જહિત ભવસઙ્કોચમખિલમ્ ॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
કૃતઃ સપર્યા પર્યાયઃ કૃષ્ણાનન્દેન યોગિના ।

ઇતિ કૃષ્ણાનન્દકૃતિષુ સપર્યા પર્યાય સ્તવઃ સમ્પૂર્ણઃ ॥

Notes:
The text shows how material worship of personal God should culminate in mental worship of the impersonal and how the former becomes meaningless and farcical at a stage when the individual attains a higher plane of life, shedding imposed limitations on the unlimited infinite. In effect it is an amplification of the wellknown passage of Bṛhadaranyakōpanisad

મન્ત્ર ૧૪ [II.iv.14]
યત્ર હિ દ્વૈતમિવ ભવતિ તદિતર ઇતરં જિઘ્રતિ તદિતર ઇતરં
પશ્યતિ તદિતર ઇતરઁ શ઼ૃણોતિ તદિતર ઇતરમભિવદતિ તદિતર
ઇતરં મનુતે તદિતર ઇતરં વિજાનાતિ । યત્ર વા અસ્ય સર્વમાત્મૈવાભૂત્
તત્કેન કં જિઘ્રેત્ તત્કેન કં પશ્યેત્ તત્કેન કઁ શ઼ૃણુયાત્ તત્કેન
કમભિવદેત્ તત્કેન કં મન્વીત તત્કેન કં વિજાનીયાત્ । યેનેદઁ
સર્વં વિજાનાતિ તં કેન વિજાનીયાદ્ વિજ્ઞાતારમરે કેન વિજાનીયાદિતિ ॥ ૧૪॥

Proofread by Rajesh Thyagarajan

*Saparya Paryayah*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*